No. 9025 - घ

Title तत्वबोधः

Author

Extent 4 Age

Subject वेदान्तशास्त्रम्, सम्पूर्णम्

नं॰ १०२५ - घ

तत्त्वबोधः (वेदान्तशास्त्रम्) पत्राणि ४

पत्राणि ४ (चत्वारि)

नं॰ १०२५ - घ

सं० २०२५

तत्त्वबोधार्थं

४ पत्राणि

वेदान्तशास्त्रीय संस्कृत

त॰ १

ॐ श्रीगणेशाय नमः ॥ ॐ वासुदेवेंद्रयोगींद्रं नत्वा ज्ञानप्रदं गुरुं ॥ मुमुक्षूणां हितार्था
यतत्त्वबोधो विधीयते ॥ ॥ साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतंतत्त्व
विवेकप्रकारं वक्ष्यामः ॥ साधनचतुष्टयं किं ॥ नित्यानित्यवस्तुविवेकः ॥ इहामुत्रा
र्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वं चेति ॥ नित्यं वस्त्वेकं ब्रह्म तद्
व्यतिरिक्तं सर्वमनित्यं अयमेव नित्यानित्यवस्तुविवेकः ॥ विरागः कः ॥ इह स्वर्गभो
गेष्विच्छाराहित्यं शमादिसाधनसंपत्तिः का ॥ शमोदमस्तितिक्षा श्रद्धा समाधानं
चेति शमः कः मनोनिग्रहः दमः कः चक्षुरादिबाह्येंद्रियनिग्रहः तपः किं ॥ स्वधर्मानु
ष्ठानमेव ॥ तितिक्षा का शीतोष्णसुखदुःखसहिष्णुत्वं ॥ श्रद्धा कीदृशी ॥ गुरुवेदांतवा
क्यादिषु विश्वासः ॥ श्रद्धा समाधानं किं चित्तैकाग्रता मुमुक्षुत्वं ॥ मोक्षो मे भूयादिति १
इच्छा ॥ एतत्साधनचतुष्टयं तेन तत्त्वविवेकस्याधिकारिणो भवंति ॥ तत्त्वविवेकः

कःआत्मासत्यन्तदन्यत्सर्वंमिथ्येति ॥ आत्माकःस्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः
पंचकोशातीतःसन्नवस्थात्रयसाक्षीसच्चिदानंदस्वरूपःसन्यस्तिष्ठतिसआत्मा स्थूल
शरीरंकिंपंचीकृतपंचमहाभूतैःकृतंसत्कर्मजन्यंसुखदुःखादिभोगायतनंशरीरं
अस्तिजायतेवर्धतेविपरिणमतेअपक्षीयतेविनश्यतीतिषड्विकारवत् ॥ एतत्स्थू
लशरीरंसूक्ष्मशरीरंकिंअपंचीकृतपंचमहाभूतैःकृतंसत्कर्मजन्यंसुखदुःखादि
भोगसाधनंज्ञानेंद्रियाणिपंचकर्मेंद्रियाणिपंचप्राणादयःपंचमनश्चैकंबुद्धिश्चैका
एवंसप्तदशकलाभिःसहतिष्ठतितत्सूक्ष्मशरीरंकारणशरीरंकिंअनिर्वाच्यानाद्य
विद्यारूपंशरीरद्वयस्यकारणमात्रंसत्स्वरूपाज्ञानंनिर्विकल्पकरूपंयदस्तितत्का
रणशरीरं ॥ अवस्थात्रयंकिं ॥ जाग्रत्स्वप्नसुषुप्त्यवस्थाः जाग्रदवस्थाका ॥ श्रोत्रादिज्ञाने
न्द्रियैःशब्दादिविषयैश्चज्ञायते ॥ इतियत्तज्जाग्रदवस्थास्थूलशरीराभिमानीआ

विश्व इत्युच्यते स्वप्नावस्था केति चेत् जाग्रदवस्थायां यद्दृष्टं यच्छ्रुतं तज्जनितवासनया निद्रासमये यः प्रपंचः प्रतीयते सा स्वप्नावस्था सूक्ष्मशरीराभिमानी आत्मा १

त॰ २ त्मा तैजस इत्युच्यते ॥ सुषुप्त्यवस्था का ॥ अहं किमपि न जानामि सुखेन मया निद्रानुभूयत ॥ इ
ति सुषुप्त्यवस्था कारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते ॥ पंचकोशाः के अन्न
मयः प्राणमयः मनोमयः विज्ञानमयः आनंदमयश्चेति ॥ अन्नमयः कः अन्नरसेनैव भू
त्वा अन्नरसेनैव अभिवृद्धिं प्राप्य अन्नरूपपृथिव्यां यद्विलीयते तदन्नमयः कोशः स्थू
लशरीरं ॥ प्राणमयः कः प्राणादि पंचवायवः वागादीन्द्रियपंचकं प्राणमयः कोशः मनो
मयः कः मनश्च ज्ञानेन्द्रियपंचकं मिलित्वा भवति मनोमयः कोशः विज्ञानमयः कः बु
द्धिज्ञानेन्द्रियपंचकं मिलित्वा विज्ञानमयः कोशः भवति ॥ आनंदमयः कोशः कः एवमे
व कारणशरीरभूतमविद्यास्थमलिनसत्वं प्रियादिवृत्तिसहितं सत् आनंदमयः को
शः एतत्कोशपंचकं च ॥ मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीय
मज्ञानमिति स्वेनैव ज्ञायते ॥ तद्यथा मदीयत्वेन ज्ञातं कुंडलकटककगृहादिकं स्वस्माद्भिन्न

तथापंचकोशादिकंमदीयत्वेनज्ञातं॥आत्मानभवति॥आत्माकस्तर्हिसच्चिदानंदस्व
रूपःसत्किंच कालत्रयेपितिष्ठतीति॥सत्चित्का॥ज्ञानस्वरूपाआनंदःकःसुखस्वरूपः
एवंसच्चिदानंदस्वरूप॥स्वात्मानंविजानीयात॥अथचतुर्विंशतितत्वोत्पत्तिंवक्ष्यामः
ब्रह्माश्रयासत्वरजस्तमोगुणात्मिकामाया॥अस्तिततः आकाशःसंभूतःआका
शाद्वायुःवायोस्तेजः तेजसःआपःअद्भ्यः पृथिवीतेषांपंचतत्वानांमध्येआकाशस्य
सात्विकांशात॥श्रोत्रेंद्रियंसंभूतं॥वायोःसात्विकांशात्वगिंद्रियंसंभूतंअग्नेःसात्विकां
शात॥चक्षुरिंद्रियंसंभूतंपृथिवीसात्विकांशात घ्राणेंद्रियंसंभूतं॥एतेषांपंचतत्वा
नांसमष्टिसात्विकांशात अंतःकरणातद्वृत्तिभेदान्मनोबुद्ध्यहंकारचित्तानीत्यंतःक
रणानिसंभूतानि॥एतेषांपंचतत्वानांमध्ये आकाशस्यराजसांशात्वागिंद्रियसं
भूतं वायोः राजसांशात्पाणींद्रियंसंभूतं॥वह्नेः राजसांशात्पादेंद्रियंसंभूतं॥जल

जलस्यसात्विकांशातरसनाइंद्रियसंभूतं

त॰ ३

स्यराजसांशात्उपस्थेंद्रियंसंभूतं॥पृथिवीराजसांशात्पाय्विंद्रियंसंभूतं॥एतेषांपंचतत्त्वा
नांसमष्टिराजसांशात्प्राणापंचकंसंभूतं॥एतेषांपंचतत्त्वानांतामसांशात्पंचीकरणं
भवति॥पंचीकरणंकथमितिचेत्एतेषांपंचमहाभूतानांतामसांशस्वरूपंएकंएकंभूतंद्वि
धाविभज्यएकंएकमर्द्धंपृथक्तूष्णींव्यवस्थाप्यअपरंअपरमर्द्धंचतुर्धाविभज्यस्वार्द्धमन्येषु
स्वभागचतुष्टयसंयोजनंकार्यंतदापंचीकरणंभवति एतेभ्यःपंचीकृतपंचमहाभू
तेभ्यःस्थूलशरीरंभवति॥एवंपिंडब्रह्मांडयोरैक्यं ब्रह्मांडेचसंभूतंस्थूलशरीराभिमा
नीजीवनामकोब्रह्मप्रतिबिंबोभवति॥सएवजीवःप्रकृत्यास्वस्मात्ईश्वरंभिन्नत्वेनजा
नाति॥अविद्योपाधिःसन्आत्माजीवइत्युच्यते॥मायोपाधिःसन्ईश्वरइत्युच्यते॥एवं
उपाधिभेदात्जीवेश्वरभेददृष्टिर्यावत्पर्यंतंतिष्ठतितावत्पर्यंतंजन्ममरणादिरूपःसंसा
रोननिवर्ततेतस्मात्कारणात्नजीवेश्वरभेदबुद्धिःकार्याननु॥साहंकारस्यकिंचिज्ञ ३

तस्य जीवस्य निरहंकारस्य सर्वेश्वरस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः स्या-
दुभयोर्विरुद्धधर्माक्रांतत्वादिति चेत् तत्र स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्यार्थ उपा-
धिविनिर्मुक्तसमाधिदशासंपन्नः शुद्धचैतन्यं लक्ष्यं ॥ एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्
त्पदवाच्यम् ॥ उपाधिशून्यं शुद्धचैतन्यं लक्ष्यम् एवं च ॥ जीवेश्वरयोः अभेदबाधकाभावः
एवं च वेदांतवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिः स्यात् ते जीवन्मुक्ताः
इत्यर्थः ननु जीवन्मुक्तः कैः यथा देहोहं पुरुषोहं ब्राह्मणोहं क्षत्रियोहं वैश्योहं शूद्रोहमस्मी-
ति दृढनिश्चयस्तथा नाहं ब्राह्मणः न शूद्रः न पुरुषः किंतु असंगः सच्चिदानंदस्वरूपः
प्रकाशरूपः सर्वांतर्यामि चिदानंदस्वरूपोहमस्मि ॥ इति दृढनिश्चयरूपोऽपरोक्षज्ञानवा-
न् जीवन्मुक्तः ब्रह्मैवाहमस्मीति अपरोक्षज्ञानेन निखिलकर्मबंधविनिर्मुक्तः स्यात्
कर्माणि कतिविधानि संति चेत् आगामिसंचितप्रारब्धभेदेन त्रिविधानि संति ज्ञानोत्प-

त॰ ५

त्यनंतरं ॥ ज्ञानिदेहकृतं पुण्यपापरूपकर्म यदस्ति तदागामीत्यभिधीयते ॥ संचितकर्म किं अ
नंतकोटिजन्मनां बीजभूतं सत् ॥ यद्यत्कर्मजातं पूर्वार्जितं तिष्ठति तत्संचितं ज्ञेयं ॥ प्रार
ब्धं कर्म किमिति चेत् ॥ इदं शरीरमुत्पाद्य इह लोके एवं सुखदुःखादिप्रदं ॥ यत्कर्म तत्प्रारब्धं ।
भोगेन नष्टं भवति ॥ प्रारब्धकर्मणां भोगादेव क्षय इति ॥ संचितं कर्म ॥ ब्रह्मैवाहमिति निश्च
यात्मकज्ञानेन नश्यति ॥ आगामिकर्मापि ज्ञानेन नश्यति ॥ किंच ॥ आगामिकर्मणां ।
नलिनीदलगतजलवत् ज्ञानिनां संबंधो नास्ति ॥ किंच ॥ ये ज्ञानिनं स्तुवंति भजंति
अर्चयंति तान्प्रति ज्ञानिकृतं ॥ आगामिपुण्यं गच्छति ये ज्ञानिनं निंदंति द्विषंति ॥ यो पा
दुःखप्रदानं कुर्वंति ॥ तान्प्रति ज्ञानिकृतं ॥ सर्वमागामि क्रियमाणं यदवाच्यं कर्म पापा
त्मकं गच्छति ॥ तथा च श्रुतिः ॥ सुहृदः पुण्यकृत्यां द्विषंतः पापकृत्यां गच्छंतीति तथा
चात्मवित्संसारं तीर्त्वा ब्रह्मानंदमिहैव प्राप्नोति तरति शोकमात्मविदित्यादिश्रुतेः ।

५